**संस्कृत वार्ता:**

**दिनाङ्क** :- **05.09.2026** **प्रात**: - **06:55**

**अथवार्ताः**

**शिक्षकदिवसः**

राष्ट्रपतिपदासीना द्रौपदी मुर्मुः शिक्षकान् शिक्षाविदश्च स्वज्ञानं निरन्तरं प्रवर्धनाय, प्रौद्योगिकीम् अङ्गीकरणाय, नवोन्मेषपूर्णाः शिक्षणपद्धतीश्च आत्मसात्करणाय च आहूतवती। अद्य शिक्षकदिवसावसरे स्वीयसन्देशे एषा उक्तवती यत् शिक्षकाः शिक्षाविदश्च स्वमार्गदर्शनेन परामर्शेन च प्रतिभापोषणे चरित्रनिर्माणे च महत्वपूर्णां भूमिकां निर्वहन्ति। सा उक्तवती यत् समर्पिताः संवेदनशीलाश्च शिक्षकाः विद्यार्थिनां विशिष्टक्षमताः ज्ञात्वा तान् प्रेरयन्ति तथा उत्कृष्टतां प्राप्तुं प्रयत्नाय प्रोत्साहयन्ति। प्रसिद्धस्य शिक्षाविदः लेखकस्य दार्शनिकस्य पूर्वराष्ट्रपतेः च डॉ. सर्वपल्ली-राधाकृष्णन् इत्यस्य जन्मजयन्त्याः उपलक्ष्ये प्रतिवर्षं सितम्बर-मासस्य पञ्चमे दिवसे शिक्षकदिवसः आचर्यते। राष्ट्रनिर्माणे शिक्षकानां शिक्षाविदां च महत्वपूर्णां भूमिकां सम्मानयितुम् अयं दिवसः आचर्यते। अस्मिन् अवसरे राष्ट्रपतिः मुर्मुः अद्य नवदिल्ल्याम् अष्टचत्वारिंशत्-विद्यालयीयशिक्षकेभ्यः राष्ट्रियशिक्षक-पुरस्कारान् प्रदास्यति। चयनिताः अष्टचत्वारिंशत्-शिक्षकाः सप्तविंशति-राज्येभ्यः, सप्त-केन्द्रशासित-प्रदेशेभ्यः तथा षड्-केन्द्रप्रशासकीय-सङ्घटनेभ्यः च सन्ति। राष्ट्रपतिः उच्चशिक्षासंस्थानेभ्यः पॉलिटेक्निक्-संस्थानेभ्यश्च एकविंशति-शिक्षकान् सङ्कायसदस्यान् च राष्ट्रियपुरस्कारैः सम्मानयिष्यति।

**प्रधानमन्त्री - एसआरसीसी**

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां श्रीराम-कॉलेज्-ऑफ-कॉमर्स् इत्यस्य महाविद्यालयस्य शताब्दीसमारोहे भागं ग्रहीष्यति। श्रीमोदी अस्मिन् अवसरे आयोजितां सभां सम्बोधयिष्यति। दिल्ली-विश्वविद्यालयस्य अन्तर्गतं स्थितं श्रीराम-कॉलेज्-ऑफ-कॉमर्स् इति महाविद्यालयः भारतस्य प्रमुखेषु उच्चशिक्षासंस्थानेषु अन्यतमः अस्ति। वाणिज्ये, अर्थशास्त्रे, प्रबन्धने च इदं प्रतिष्ठितं शिक्षाकेन्द्रम् अस्ति।

**उपराष्ट्रपतिः - चेन्नई-यात्रा**

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् अद्य तमिलनाडुराज्यस्य चेन्नईनगरस्य एकदिवसीय-यात्रायां भविष्यति। स्वयात्रावधौ उपराष्ट्रपतिः ऐषमः इण्डिया वाल्वेस इत्यस्मिन् कार्यक्रमे भागं ग्रहीष्यति। अयं हृदयस्य वाल्व्-सम्बद्धानां संरचनात्मकानां च रोगाणां चिकित्सायाः उन्नयनम् उद्दिश्य आयोजितः राष्ट्रियस्तरीयः

शैक्षणिकसमागमः अस्ति। सः चेन्नईनगरस्य गुड्डी-प्रदेशे इण्डिया-वाल्व-रजिस्ट्री इत्यस्य शुभारम्भमपि करिष्यति।

**ब्रिक्स्-मुख्यन्यायाधीश-मञ्चः**

नवदेहल्यां त्रि-दिवसीयः 'ब्रिक्स्-मुख्यन्यायाधीश-मञ्चः' अद्य प्रारब्धः। अस्मिन् सम्मेलने ब्रिक्स्-राष्ट्राणां सर्वोच्च-न्यायालयानां मुख्यन्यायाधीशाः वरिष्ठ-न्यायाधीशैः सह भागं गृह्णन्ति। भारतस्य मुख्यन्यायाधीशः सूर्यकान्त-वर्यः विविध-देशानां न्यायिक-प्रतिनिधिभिः सह द्विपक्षीय-वार्तां कृतवान्। मन्त्रणायां न्याय-प्रदाने आधुनिक-प्रविधीनाम् उपयोगाय, न्यायिक-सहयोगं वर्धयितुं तथा च त्वरित-न्याय-प्रक्रियया जन-सम्बन्धान् सुदृढं कर्तुं बलम् दत्तम्।

**विदेश-मन्त्री पोलैण्ड्**

विदेश-मन्त्री डॉ. एस. जयशङ्करः पोलैण्ड्-देशस्य राजधान्यां वारसॉ-नगरे राष्ट्रपतिना कारोल नाव्रोत्स्की-वर्येण सह उच्च-स्तरीय-मन्त्रणाम् अकरोत्। उभौ नेतारौ द्विपक्षीय-रणनीतिक-संधेः समीक्षां कृत्वा विविध-क्षेत्रेषु सहयोगं नूतन-औन्नत्यं नेतुम् अङ्गीकृतवन्तौ। जयशङ्करेण पोलैण्ड्-संसद्-सदस्यैः सहापि कूटनीतिक-सम्बन्धेषु विस्तृत-संवादः विहितः।

**नेपालः**

नेपाले आप्लाव-विभीषिकां समीक्षितुं विदेश-मन्त्रालयेन सूचना प्रख्यापिता। त्रिशूली-नदी-क्षेत्रात् त्रिभारतीयान् निष्कास्य सुरक्षितानां सङ्ख्या नवषष्ट्युत्तरैकशत अभवत्। मन्त्रालयस्य प्रवक्ता रणधीर-जैसवालः संसूचितवान् यत् जनानाम् अन्वेषणाय आपद्-उद्धार-कार्याणि तीव्रतया क्रियन्ते। काठमाण्डू-दूतावासः विमानैः भारतीयान् भारतं आनयति। भारतेन नेपालाय निरन्तरं सहायता-प्रदानस्य प्रतिज्ञा कृता।

**क्रिकेट्**

महिला-क्रिकेट्क्रीडायां भारतम् अद्य ऐषमः महिला-एशिया-चषकप्रतिस्पर्धायां दुबई-अन्ताराष्ट्रिय-क्रीडाङ्गणे पाकिस्तानदलं सम्मुखीकरिष्यति। इयं स्पर्धा भारतीयसमयानुसारं रात्रौ अष्टवादने प्रारप्स्यते।

॥ **इति वार्ताः**॥